नानामायाप्रचरन्तं मदगर्व्वनदर्पितं ।
स तं दृष्ट्वा द्विजोऽपृच्छदनन्तं दृष्टवान् किमु ॥
प्रत्युत्तरमुवाचेदं नानन्तं वेद्मि हे द्विज ।
ततो व्रजन् ददर्शाग्रे रम्यं पुष्करिणीद्वयं ।
अन्योन्यजलसंघातैर्व्वीचिभिश्चपशोभितं ।
शुभैः कुमुदकह्लारैः कमलोत्पलशोभितं ॥
भ्रमरैश्चक्रवाकैश्च हंसकारण्डवैर्वृतं ।
तमपृच्छत् द्विजोऽनन्तो भवतीभ्याञ्च लक्षितः ॥
पुष्करिण्यावूचतुस्तं न जानीवो हरिं क्वचित् ।
निपपात ततो विप्रो हाहा कृत्वा रुदन् भुवि ॥
किं करोमि क्व गच्छामि कथं पश्यामि तं विभुं ॥*॥
ततः कृपालुहृदयो देवेशो देवपूजितः ॥
तत्क्षणाद्भगवान् विष्णुर्द्विजप्रत्यक्षमागतः ।
वृद्धब्राह्मणरूपेण प्रोवाच वचनं द्विजं ॥
उत्तिष्ठोत्तिष्ठ विप्रेन्द्र त्यज दुःखं सुखी भव ।
अनन्तं दर्शयिष्यामि कृष्णं विष्णुं हरिं शिवं ॥
ब्राह्मणं तं समादाय पातालवर्त्मना पुरीं ।
तां पुरीं दर्शयामास ततश्चान्तर्द्दधे द्विजः ॥
स तां ददर्श कौण्डिन्यः पुरीं त्रैलोक्यदुर्लभां ॥
दिव्यनारीनरैर्युक्तां मणिरत्नविभूषितां ॥
सुवर्णरचितां सर्व्वां वेष्टितां तक्षकादिभिः ।
तत्रापश्यत् स कौण्डिन्यो देवदेवमनन्तकं ॥
विश्वरूपं जगन्नाथं चतुर्बाहुं किरीटिनं ।
शङ्खचक्रगदापद्मधारिणं गरुड़ध्वजं ॥
दक्षिणे विलसल्लक्ष्मीं वामे क्रीड़त्सरस्वतीं ।
सप्तफणासमायुक्तं दिव्यसिंहासनेस्थितं ॥
एवं रूपं जगन्नाथं दृष्ट्वा भक्त्या स्तुतिं कृता ।
जगाम भूमौ शिरसा अनन्तस्य समीपतः ॥

नमोऽस्त्वनन्ताय सहस्रमूर्त्तये
सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते
सहस्रकोटीयुगधारिणे नमः ॥

अज्ञानेन मया देव यत् कृतं पापकर्म्मणा ।
तत्सर्व्वं कृपया शंस क्षमस्व मधुसूदन ॥ * ॥
अथ कौण्डिन्यविप्रस्य स्तुतिं श्रुत्वा जनार्द्दनः ।
प्रसन्नो भगवान्देवश्चानन्तोऽनन्तरूपधृक् ॥
कथं मे प्रियमाख्यातमिहागच्छेति भूसुर ॥*॥

अनन्त उवाच ।

तुष्टोऽहं ब्राह्मणश्रेष्ठ भक्त्या तव विशेषतः ।
वरं गृहाण विप्रेन्द्र तुष्टोऽस्मि त्यज विस्मयं ॥ * ॥

कौण्डिन्य उवाच ।

स्वकर्म्मफलभोगेन यां यां योनिं व्रजाम्यहं ।
तस्यां तस्यां हृषीकेश हरिभक्तिर्दृढ़ास्तु मे ॥
अतिप्रमादान्मोहाद्वा यन्मया दुष्कृतं कृतं ।
तदागः क्षम्यतां नाथ प्रणमामि पुनः पुनः ॥
श्रुत्वानन्तस्तु तद्वाक्यं ददौ तस्मै वरत्रयं ।
दारिद्र्यनाशनं धर्म्मं विष्णुलोकं तथाक्षयं ॥०॥

कौण्डिन्य उवाच ।

पूर्णो मनोरथो देव मम चाद्य विशेषतः ।
किञ्चित् पृच्छामि देवेश तन्मे ब्रूहि जगत्पते ॥
कश्चूतः को वृषः का गौः किन्तत् पुष्करिणीद्वयं ।
कः खरः कुञ्जरः को वा को वा वृद्धद्विजोत्तमः ॥
कृपया कथयस्वाद्य पथि दृष्टो मया विभो ।

श्रीअनन्त उवाच ।

यस्त्वाम्रवृक्षो दृष्टो हि विप्रो विद्यासु गर्व्वितः ।
उपस्थिताय शिष्याय विद्यां यस्मान्न दत्तवान् ॥
तेन कर्म्मविपाकेन वृक्षत्वं प्राप्य तिष्ठति ।
वृषभो यस्त्वया दृष्टो लोभकर्म्मकृतः पुरा ॥
दत्तं पर्य्युषितं द्रव्यं स्वादु भुक्तं स्वयं यतः ।
वृषभत्वं समासाद्य ततस्तिष्ठति निर्ज्जने ॥
विप्राय वसुधां दत्त्वा निष्फलां शस्यवर्ज्जितां ।
तेनासौ गोत्वमासाद्य वनमध्ये प्रधावति ॥
धर्म्माधर्म्मौ विजानीयाद्यत्तत् पुष्करिणीद्वयं ।
गर्द्दभोऽज्ञानसम्पन्नः कुञ्जरो मदगर्व्वितः ॥
ब्राह्मणोऽसावनन्तोऽहं यस्त्वया दर्शितो मुने ।
एतत्ते कथितं सर्व्वं गच्छ विप्र निजाश्रमं ॥
पुनः समृद्धिस्ते विप्र भविष्यति न संशयः ।
भुक्त्वा भोगांश्च विपुलान् संप्राप्स्यसि महत् पदं ॥
इति दत्त्वा वरं तस्मै तत्रैवान्तरधीयत ।
कौण्डिन्योऽपि गृहं गत्वा करोति व्रतमुत्तमं ॥
अनन्ताख्यं महापुण्यं वर्षाणाञ्च चतुर्द्दश ।
शीलया सह धर्म्मात्मा सुखं भुक्त्वा मनोरथान् ॥
विष्णुलोकं समासाद्य रराज शीलया सह ।
अनन्ताख्यव्रतेनेह समाप्तेनैव पार्थिव ॥
सर्व्वपापविनिर्म्मुक्ता यास्यन्ति परमां गतिं ।
एवमेवं हि नियमात् स्त्रियोऽनन्तव्रतान्नृप ॥
पुत्त्रपौत्त्रधनैर्युक्ता भुक्त्वा भोगान् मनोरथान् ।
विष्णुलोकमवाप्नुवन्ति यावच्चन्द्रदिवाकरौ" ॥
इति भविष्यपुराणे अनन्तव्रतं समाप्तं ॥

अनन्तशीर्षा, स्त्री, (अनन्तानि बहूनि शीर्षाणि शिरांसि यस्याः सा ।) वासुकिपत्नी । इति शब्दमाला ॥

अनन्ता, स्त्री, (नास्ति अन्तो यस्याः सा ।) पार्व्वती । पृथिवी । अग्निशिखावृक्षः । श्यामालता । दूर्व्वा । पिप्पली । दुरालभा । हरीतकी । आमलकी । गुड़ूची । इति मेदिनी ॥ यवासः । श्वेतदूर्व्वा । नीलदूर्व्वा । अग्निमन्थवृक्षः । इति राजनिर्घण्टः ॥ अनन्तमूलं । तत्पर्य्यायः । गोपवल्ली २ कारोला ३ सुगन्धा ४ भद्रवल्लिका ५ भद्रा ६ नागजिह्वा ७ । इति रत्नमाला ॥ गोपी ८ श्यामा ९ शारिवा १० उत्पलशारिवा ११ । इत्यमरः ॥ गोप्यादिपञ्चश्यामलतायां नागजिह्वायां इति केचित् । गोप्यादिचयं श्यामलतायां अनन्तोत्पलशारिवेति द्वयं अनन्तमूले इति केचित् । इति तट्टीकायां भरतः ॥ तस्या गुणाः । मलबन्धकारित्वं । रक्तपित्तनाशित्वं । शीतलत्वञ्च । इति राजवल्लभः ॥

अनन्यगतिकः, त्रि, (नास्ति अन्या गतिः यस्य । समासान्तः कः ।) गत्यन्तररहितः । एकाश्रयः ।
"अनन्यगतिके जने विगतपातके चातके
यथारुचि तथा कुरु प्रिय तथापि नान्यं भजे" ।
इत्युद्भटः ॥

अनन्यजः, पुं, (नास्ति अन्यत् यस्मात् सः अनन्यो विष्णुः, तस्मात् जात इति, अनन्य + जन् + ड ।) कामदेवः । इत्यमरः ॥

अनन्यवृत्तिः, त्रि, (न अन्या वृत्तिरस्य इति ।) एकमात्रवृत्तिः । तत्पर्य्यायः । एकतानः २ एकाग्रः ३ एकायनः ४ एकसर्गः ५ एकाग्र्यः ६ एकायनगतः ७ । इत्यमरः ॥

अनपायी, [न्] त्रि, (नास्ति अपायः विनाशोऽस्य इति, न + अपाय + इनि ।) निश्चलः । अपायशून्यः । अनश्वरः । यथा,—
"अनपायिभिरस्माभिर्गुप्तायाश्च गृहे प्रभो" ।
इति श्रीभागवतं ॥
("अनपायिनि संश्रयद्रुमे गजभग्ने पतनाय वल्लरी" ।
इति कुमारे ॥)

अनभिज्ञः, त्रि, (अभि जानाति इति अभिज्ञः, अभि + ज्ञा + कः, न अभिज्ञ इति नञ्समासः ।) मूर्खः । प्रज्ञारहितः । बुद्धिहीनः । यथा,—
"धिक् त्वां चूततरो परापरपरिज्ञानानभिज्ञो भवान्"
इति भ्रमराष्टकं ॥

अनभिलाषः, पुं, (न अभिलाष इति नञ्समासः ।) अरुचिः । इति राजनिर्घण्टः ॥ अनिच्छा ॥ (त्रि, नास्ति अभिलाषो यस्य इति समासे अभिलाषशून्यः ।)

अनमः, पुं, (नमति प्रणमति इति नमः, नम् + पचाद्यच्, न नमः अनम इति नञ्समासः ।) ब्राह्मणः । इति त्रिकाण्डशेषः ॥

अनमितम्पचः, त्रि, (मितं परिमितं पचति इति, मित + पच् + खच्, न मितम्पच इति अमितम्पचः, न अमितम्पच इति अनमितम्पचः, नञ्समासः ।) मितम्पचः । कृपणः । इत्यमरटीकायां रमानाथः ॥

अनम्बरः, पुं, ((नास्ति अम्बरं परिधेयं यस्य सः ।) बौद्धविशेषः । इति सिद्धान्तशिरोमणौ गोलाध्यायः ॥

अनयः, पुं, (अयः शुभावहो विधिस्तद्भिन्नः नञ्समासः ।) दैवं । अशुभं । व्यसनं । विपद् । इति मेदिनी ॥
("अनयो नयसम्पन्ने यत्र ते विकृता मतिः" ।
इति रामायणे ।)

अनर्गलं, त्रि, (नास्ति अर्गलं प्रतिबन्धो यस्य तत् ।) निरर्गलं । प्रतिबन्धकरहितं । तत्पर्य्यायः । अवाधं २ उच्छृङ्खलं ३ उद्दाम ४ नियन्त्रितं ५ निरङ्कुशं ६ । इति हेमचन्द्रः ॥
("ततः परं तेन मखाय यज्वना
तुरङ्गमुत्सृष्टमनर्गलं पुनः ।
इति रघुवंशे ।)

अनर्थकं, क्ली, (नास्ति अर्थः यस्य तत्, समासान्तः कः ।) निरर्थकं । अर्थशून्यवाक्यं । तत्पर्य्यायः । अबद्धं २ । इत्यमरः ॥ अवध्यं ३ । इति तट्टीका ॥

अनलः, पुं, (नास्ति अलः वहुदाह्यवस्तुदहनेऽपि तृप्तिर्यस्य सः, कृत्तिकानक्षत्रे, वत्सरे भगवति वासुदेवे ।) अग्निः । वसुभेदः । इति मेदिनी ॥ चित्रकः । रक्तचित्रकः । भल्लातकः । पित्तं । इति राजनिर्घण्टः ॥

अनलप्रभा, स्त्री, (अनलस्य वह्नेः प्रभेव प्रभा यस्याः